# ब्रह्मणो हि प्रतिष्ठाऽहमिति स्मृत्यर्थसम्मर्शः
# Brahmaṇo hi pratiṣṭhā'hamiti smṛtyarthasammarśaḥ

**Tirthankar Dey**
Research Scholar
Ramakrishna Mission Vivekananda
Educational and Research Institute
Belur Math, Howrah, West Bengal, India
Email: tirthankar1998dey@gmail.com

**Abstract:** ब्रह्मणो हि प्रतिष्ठाहम् इति इमां स्मृतिमाश्रित्य विचारः शोधपत्रेऽस्मिन् उपस्थापितः। अस्याः स्मृतेः व्याख्यानं भगवान् भाष्यकारः द्वेधा कृतवान्। प्रथमव्याख्यानसन्दर्भे ब्रह्मणः इति पदेन परमात्मा गृह्यते, अहमिति पदेन प्रत्यगात्मा ग्राह्यः। तेन अहं प्रत्यगात्मा वासुदेवः परमात्मनः प्रतिष्ठाभूतः अस्मि। द्वितीयव्याख्यानसन्दर्भे ब्रह्मणः इति पदेन सविकल्पकं ब्रह्म ग्राह्यम्, अहमिति पदेन निरुपाधिकं ब्रह्म स्वीकर्तव्यम्। तेन अहं निरुपाधिकं ब्रह्म सविकल्पकब्रह्मणः प्रतिष्ठा अस्मि इति तात्पर्यार्थः। श्रीधराचार्यनये तु अहं वासुदेवः परमात्मनः प्रतिष्ठा अस्मि इत्येव तात्पर्यभूतः अर्थः। तत्र एकं विलक्षणं दृष्टान्तं श्रीधराचार्यः प्रयुङ्क्ते घनीभूतः प्रकाशः एव सूर्यमण्डलम् इति सूर्यमण्डलप्रकाशयोः भेदः यथा न सम्भवति। तद्वत् अहमपि ब्रह्मणः स्वरूपभूतः इत्यर्थः। मधुसूदनाचार्यस्तु अहमिति पदेन निरुपाधिकं ब्रह्म गृह्णाति, ब्रह्म इति पदेन सविकल्पकं ब्रह्म गृह्णाति। तेन अयमर्थः सिद्ध्यति मधुसूदनाचार्याणां पक्षे— अहं निरुपाधिकं ब्रह्म अमृतादिविशेषणयुक्तस्य सविशेषब्रह्मणः प्रतिष्ठा अस्मि इति।

Keywords: स्मृतिः, ब्रह्मस्वरूपम्, ईश्वरः, ब्रह्मलाभः।

**उपोद्घातः**— ब्रह्मात्मैक्यं प्रस्थीयते ज्ञायतेऽनेनेति प्रस्थानम्। वेदान्तशास्त्रेऽत्यन्तं प्रसिद्धं तावत् प्रस्थानत्रयम्। प्रस्थानत्रयत्वेन श्रुतिः स्मृतिः न्यायश्च विज्ञायन्ते। त्रिषु प्रस्थानेषु अन्यतमं तावत् स्मृतिप्रस्थानम्। स्मृतिप्रस्थानमेव श्रीमद्भगवद्गीता। श्रीमद्भगवद्गीतायाम् अष्टादश अध्यायाः विद्यन्ते। अष्टादशसु अध्यायेषु अन्यतमः चतुर्दशाध्यायः। तत्र भगवान् प्रमुखेन अर्जुनाय गुणत्रयविभागयोगम् उपादिशत्। चतुर्दशाध्याये अन्तिमः सप्तविंशः श्लोकः तावत्—

"ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च"॥[1] इति।

अयं श्लोकः एव मम मुख्यः आलोच्यः विषयः। अस्य श्लोकस्य विशेषसमीक्षणाय चतुर्दशाध्यायस्य सामान्यः परिचयः नितान्तमावश्यकः। आदावेव तद्दीयते—

**चतुर्दशाध्यायसारः**— अस्मिन् चतुर्दशाध्याये अर्जुनस्य एकमेव वचनं लभ्यते कैर्लिङ्गैस्त्रीन्गुणानेति[2] तद्विहायान्यत्सर्वमपि वचनं भगवतः एव। आदावेव षड्विंशं श्लोकं यावच्छ्लोकसारः उपस्थाप्यते।

ज्ञानेषु उत्तमज्ञाननेन ज्ञानिनः संसारात् मोक्षप्राप्तिकथनम्। सत्त्वं रजः तमः च इति गुणत्रयैः शरीरे आत्मनः बन्धनप्रतिपादनम्। स्वच्छत्वात् सत्त्वगुणः सुखं ज्ञानं च जनयति। रागोत्पन्नेन रजोगुणेन आत्मनः कर्मसु प्रवृत्तिदर्शनम्। तमः सकलानां प्राणिनाम् अनवधानं जाड्यं निद्रां च जनयति किञ्च संसारिणं जीवं संसारसागरे निमज्जयति। सत्त्वम् आत्मनः सुखं जनयति। रजः दुःखं जनयति। तमः तु ज्ञानम् आच्छाद्य अनवधानालस्यनिद्रादिकं जनयति। क्वचित् सत्त्वम् अन्यत् गुणद्वयम् अधःकृत्य स्वकार्यं सुखमेव जनयति। क्वचिद्रजः अन्यद्गुणद्वयमधःकृत्य स्वकार्यं दुखं, क्वचित् तमः अन्यद्गुणद्वयम् अधोकृत्य स्वकार्यम् अविवेकं जनयति। पदार्थस्य यदा यथावज्ज्ञानं भवति तदा तस्मिन् पुरुषे सत्त्वगुणः वर्धितः इति बोद्धव्यम्। यदा परद्रव्यप्राप्तीच्छा, निरन्तरप्रयासः, काम्यनिषिद्धेषु च प्रवृत्तिः दृश्यते तदा रजोगुणः वर्धितः इति विज्ञेयम्। शास्त्रविहितकर्मसु विवेकनाशः अप्रवृत्तिः च वीक्ष्येते, कार्येषु अनवधानं भ्रान्तिः निद्रा इत्यादयः जायन्ते तदा तमोगुणः बृंहितः इति ज्ञातव्यम्।सत्त्वगुणे अभिवृद्धे म्रियमाणः पुरुषः ज्ञानिनां लोकान् अधिगच्छति। रजोगुणे प्रवृद्धे पुरुषः कर्मासक्तेषु मनुष्येषु जायते। तमोगुणे बृंहिते म्रियमाणः पुरुषः तु विवेकरहितपशुप्रभृतेषु जन्म अविन्दत। सत्त्वगुणस्य सुखं, रजोगुणस्य दुःखं, तमोगुणस्य अज्ञानं च इत्येवं फलं पुरुषः लभते। सात्त्विकाः ऊर्ध्वलोकं लभन्ते राजसिकाः मनुष्यलोके तिष्ठन्ति तामसिकास्तु नीचलोकं प्राप्नुवन्ति। यः सुखदुःखयोः मृत्पाषणसुवर्णेषु मानापमानयोः श्लाघनप्रशंसयोश्च समानो सः पुरुषः गुणत्रयातीतः इत्येवं बोद्धव्यम्। यः व्यभिचारवर्जनेन परमप्रेमलक्षणेन विवेकज्ञानात्मकेन भक्तिरूपसाधनेन मां सेवते सः मानवः त्रीन् गुणान् अतिक्रम्य मोक्षाय अर्हति इति।शरीरे जायमानानि सर्वाणि कर्माणि गुणाः एवं कुर्वन्ति न तु आत्मा। सः च देहगुणादिविविक्तः आत्मा केवलं कर्मणां साक्षिभूतः पुरुषः यदा विजानाति तदा सः मोक्षं विन्दते।

**"मां च यो"[3] इति स्मृत्या "ब्रह्मणो हि प्रतिष्ठाहम्" इति स्मृतेः सङ्गतिः—**

ईश्वरभजनेन ब्रह्मलाभो भवति इत्युक्तम्। तर्हि अत्र प्रश्नः समुत्पद्यते ईश्वरब्रह्मणोः कः सम्बन्धः? यः मामीश्वरं भजते सः ब्रह्मभूयाय कल्पते इति यदुक्तं तदेतत्कुतः इति उच्यते तदर्थं भगवता— 'ब्रह्मणो हि प्रतिष्ठाहम् इति'।

**विषयप्रवेशः—**

"ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च" ॥ १४.२७॥

**अन्वयः—** हि अहम् अमृतस्य अव्ययस्य च शाश्वतस्य च धर्मस्य च ऐकान्तिकस्य सुखस्य ब्रह्मणः प्रतिष्ठा।

**भावार्थः—** अहं परमात्मनः नाशरहितस्य मोक्षस्य शाश्वतस्य धर्मस्य, दुःखरहितस्य सुखस्य च प्रतिष्ठा अस्मि तेन कारणेन तादृशः पुरुषः ब्रह्मभूयाय कल्पते इति मया भगवता पूर्वं यदुक्तं तद्युक्तमेवेति।

**शङ्करभगवत्पादनयः—** ब्रह्मणः इत्यस्यार्थः परमात्मा इति भाष्यकारेण गृहीतम्। हि इति शब्दार्थो भवति यस्मादिति। अहं परमात्मनः प्रतिष्ठा अस्मि इति। प्रतिष्ठा इत्युक्ते का? तत्र भाष्यकारैः शब्दार्थः स्पष्टीकृतः— प्रतितिष्ठति अस्मिन् इति प्रतिष्ठा। यत्र तिष्ठति सा एव प्रतिष्ठा। यत्र प्रतितिष्ठति सः कः? तत्र भगवान् उत्तरति प्रत्यगात्मा सः एव अहम् अस्मि, सः एव अहं ब्रह्मणः प्रतिष्ठा अस्मि इत्यर्थः।

**प्रतिष्ठापदार्थनिरूपणम्**— प्रतिष्ठाशब्दार्थमितोऽपि विवर्णयिषामि। प्रतिष्ठा नाम आधारः स्वरूपमिति यावत्। स्वरूपे स्वयं तिष्ठति। यथा स्वरूपभूतमृदि घटः। तस्मात्स्वस्य स्वरूपमेव आधारः स्वे महिम्नि स्वस्वरूपे प्रतिष्ठितः। अनेन च स्वस्य स्वरूपमेव आधारः इति प्रतिपादनेन स्वरूपातिरिक्तः न अन्यः कश्चन आधारः। अतः न कोऽपि अस्य आधार इति। स्वरूपस्य स्वस्मात् अनतिरिक्तत्वेन स्वस्य स्वयमेव आधारः इति च ज्ञायते। इह एव भाष्यकारः वक्षयति च- सम्यग्ज्ञानेन परमात्मतया निश्चीयते प्रत्यगात्मा इति। अतः अहं भगवान् श्रीकृष्णः प्रत्यगात्मैव परमात्मनः प्रतिष्ठा इति तात्पर्यार्थः।

अत्र प्रश्नः समुदेति कीदृशस्य ब्रह्मणः प्रतिष्ठा भगवान् श्रीकृष्णः अस्ति इति। तां शङ्कां वारयति भगवान्— अमृतस्य अव्ययस्य च शाश्वतस्य च धर्मस्य च ऐकान्तिकस्य सुखस्य चेतैः विशेषणैः। तेन अमृतस्य अव्ययस्य च शाश्वतस्य च धर्मस्य च ऐकान्तिकस्य सुखस्य ब्रह्मणः प्रतिष्ठा भगवान् श्रीकृष्णः अस्ति इति।

**शाङ्करभाष्यानुसारेण परमात्मनः विशेषणानामर्थनिर्णयः—** प्रथमं विशेषणं ब्रह्मणः अमृतस्येति। तत्पदार्थः अविनाशिनः इति। अग्रे अव्ययस्य इति पदार्थः कृतः अविकारिणः इति। अस्मिन् विशेषणक्रमेऽपि युक्तिः वर्तते। ब्रह्मणः विनाशाभावादेव जन्मादिविकाराभावः इति आह अविकारिणः इति। शाश्वतस्य इति विशेषणार्थः भाष्यकारैः निर्धार्यते नित्यस्येति। अविकारिणः एव नित्यत्वमुपपद्यते अतः अव्ययत्वे सति शाश्वतत्वोपपत्तिः। धर्मस्य इत्यर्थः निश्चीयते- धर्मज्ञानस्य ज्ञानयोगधर्मप्राप्यस्य इति। धर्मप्राप्ते ब्रह्मणि धर्मत्वोपचारात् स च धर्मः ब्रह्मप्रापकः ज्ञानयोगरूपः इति। सुखस्य इति शब्दार्थं निरूपयति भाष्यकारः— आनन्दरूपस्य इति। वैषयिकेषु भोग्येषु आनन्दः व्यभिचाररूपः तथा आनन्दरूपः नात्र अभीष्टः। आनन्दरूपः इत्युक्ते अव्यभिचाररूपः आनन्दः विवक्षितः। अर्थात् अयमानन्दः कदाचित् अस्ति कदाचित् नास्ति इत्येवंविधः न अपि तु सर्वदा आनन्दस्वरूपः एव। आनन्दः गुणत्वेन न विवक्षितः प्रकृते। आनन्दस्य गुणत्वे सति तस्यानन्दस्य उत्पत्तिविनाशित्वात् घटादिवत् अनित्यत्वप्रसङ्गः स्यात्। सुखस्य विशेषणमैकान्तिकत्वमिति। तस्य ऐकान्तिकपदस्य अर्थः अव्यभिचारिणः इति। तेन ऐकान्तिकसुखस्य अर्थो भवति अव्यभिचारिणः आनन्दरूपस्य इति। अर्थात् विनाशरहितस्य आनन्दस्वरूपस्य ब्रह्मणः अहं प्रतिष्ठा अस्मि इति अर्थः।

**प्रत्यगात्मनः प्रतिष्ठाप्रतिपादनम्—** अमृतस्य अव्ययस्य शाश्वतस्य धर्मस्य ऐकान्तिकस्य सुखस्य परमानन्दरूपस्य परमात्मनः प्रत्यगात्मा एव प्रतिष्ठा। प्रत्यगात्मा हि ब्रह्म, ब्रह्मैव हि प्रत्यगात्मा इति सम्यग्ज्ञानेन निश्चीयते । तत्र प्रमाणभूता श्रुतिः— "तत्त्वमसि" "अहं ब्रह्मास्मि" "अयमात्मा ब्रह्म" इति।

यस्मात् परमात्मनः प्रत्यगात्मा एव प्रतिष्ठा अर्थात् स्वरूपः। तस्मात् प्रत्यगात्मा सम्यग्ज्ञानेन परमात्मतया निश्चीयते। प्रत्यगात्मा परमात्मनः प्रतिष्ठा इति उक्तत्वात् विद्वान् प्रत्यगात्मा अहं परमात्मस्वरूपः एव इति निश्चिनुयात्। ततश्च निश्चयात् सः ब्रह्मभूयाय कल्पते। भगवता चतुर्दशाध्यायस्य षड्विंशश्लोके गुणातीतप्राप्तेः फलोपायौ निगदितौ। तथाह्याम्नातं—

"मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते"॥१४.२६॥

यया च ईश्वरशक्त्या भक्तानुग्रहप्रयोजनाय ब्रह्म प्रवर्तते सा शक्तिः अहमर्थात् भगवान् वासुदेवः। किञ्च अहमेव ब्रह्मेति। तत्र हेतुं प्रादर्शयत् भाष्यकारः— "शक्तिशक्तिमतोः अनन्यत्वात्" इति। अहमेव ब्रह्मणः शक्तिः। शक्तिमद् ब्रह्मैव। अतः शक्तिशक्तिमतोः अभेदः स्वीक्रियते लोके। यथा अग्नेः दाहिका भवति शक्तिः। शक्तिमान् अग्निः। तयोः शक्तिशक्तिमतोः अग्निदाहिकयोः यथा अभेदः तथैव दार्ष्टान्तिके वासुदेवब्रह्मणोः अभेदः अवश्यं स्वीकर्तव्य एव।

निर्विशेषं ब्रह्मैव मायोपाधिकं सत् ईश्वरः इति उच्यते, मायावच्छिन्नचैतन्यस्य ईश्वरत्वात् तत्र चैतन्यांशस्य ब्रह्मत्वेन मायायाः एव ईश्वरांशत्वं सिद्धमतः नास्ति मायातिरिक्तः कश्चन ईश्वरः। एवमन्तःकरणातिरिक्तः जीवः अपि नास्ति एव। अन्तःकरणावच्छिन्नं चैतन्यं जीवः इति लक्षणे चैतन्यांशस्य ब्रह्मत्वात् सा च ईश्वरशब्दवाच्या मायाख्या शक्तिः एव इति ब्रह्मणः अनन्या एव यथा अग्निशक्तिः अग्नेः अनन्या तस्मात् ईश्वरः अहं ब्रह्मैव इति ईश्वरं मां ब्रह्मत्वेन विजानीयात् इति। एवं ज्ञानात् फलं तु प्रत्यगात्मनः परमात्माभेदनिश्चयात् परमात्मशक्तेः ईश्वरस्य प्रत्यगात्मशक्तेः जीवस्य च अभेदसिद्धिः। अतः अहं ब्रह्म अस्मि इति तात्पर्यार्थः। तथा चेदं निश्चीयते अहं प्रत्यगात्मा परमात्मनः प्रतिष्ठा अस्मि इति।

**अस्मद्ब्रह्मपदयोः द्वितीयार्थकथनम्—** ब्रह्मपदेन सविकल्पकं ब्रह्म गृह्यते। अहमिति अनेन निर्विकल्पकं ब्रह्म ग्राह्यम्। सविकल्पकब्रह्मणः मूलकारणम् अहं निर्विकल्पकं ब्रह्मेति अर्थान्तरं सम्भवति। ब्रह्मशब्देन सविकल्पकं ब्रह्मैव किमर्थं ग्राह्यमिति चेत् हेतुः उच्यते ब्रह्मशब्दस्य वाच्यत्वादिति। वाच्यत्वरूपधर्मस्य ब्रह्मणि विद्यमानत्वात् सविकल्पकं ब्रह्म इति व्यवह्रियते। एतादृशस्य सविकल्पकब्रह्मणः अहं निर्विकल्पकं ब्रह्म प्रतिष्ठा अस्मि इत्यर्थः।

**सविकल्पकब्रह्मणः अमृतादिविशेषणत्वम्—** कैः विशेषैः विशिष्टस्य सविकल्पकस्य ब्रह्मणः प्रतिष्ठा निर्विकल्पकं ब्रह्म अस्ति इति पृच्छति। तत्र समाधानं दीयते— अमृतस्य इति। अमृतस्य अर्थात् अमरणधर्मकस्येति। अमरणधर्मकस्येत्यस्य मरणधर्मविवर्जितस्य इत्यर्थः। अव्ययस्य इति अस्यार्थः व्ययरहितः इति। किञ्च ज्ञाननिष्ठालक्षणस्य शाश्वतस्य च नित्यस्य धर्मस्य च तज्जनितस्य

ऐकान्तिकस्य एकान्तनियतस्य सुखस्य प्रतिष्ठा अहमिति वर्तते। ज्ञाननिष्ठालक्षणस्य इत्युक्ते ज्ञानं यस्य स्वरूपं तस्य इत्यर्थः। शाश्वतस्य नाम नित्यस्य इति। ऐकन्तिकस्य इत्युक्ते एकान्तनियतस्य अव्यभिचारिणः, अर्थात्सर्वदापि स्थायिनः इत्यर्थः। एतैः अमृतादिविशेषणैः युक्तं यद्ब्रह्म तस्य ब्रह्मणः अहं प्रतिष्ठा अस्मि।

अनन्तम् अव्ययम् अमृतं ब्रह्म मुमुक्षिभिः प्राप्यते, तस्मात् अस्यापि सविशेषस्य ब्रह्मणः अहं निर्विशेषचैतन्यं प्रतिष्ठा अयमभिप्रायः। यत् निर्धर्मकं चैतन्यं तत् केनापि न प्राप्तुमर्हति। निर्धर्मके तस्मिन् प्राप्यत्वरूपधर्मायोगात्। यद्धि मुमुक्षिभिः प्राप्यते तत् मोक्षाख्यं ब्रह्म सधर्मकमेव अमृतत्वाव्ययत्वरूपधर्मवत्त्वात् तस्य। मोक्षः हि शाश्वतः निर्विकारश्च। शुद्धचैतन्ये बन्धवत् मोक्षस्यापि अभावात्। निर्विकारः शाश्वतः मोक्षः कल्पितः एव अविद्यया चैतन्ये। निर्विकारत्वादिधर्माणां चैतन्ये कल्पितत्वात् तद्वतः मोक्षस्यापि कल्पितत्वमिति भावः।

**श्रीधराचार्यमतम्**— नारायणाख्यः ईश्वरः अहं ब्रह्मणः प्रतिष्ठा अस्मि। तत्र प्रतिष्ठा इत्यर्थो भवति प्रतिमा। अहं नारायणः घनीभूतं ब्रह्म एव। न तु ब्रह्मणः भिन्नः अहमिति। कुतः तत्र श्रीधराचार्यः दृष्टान्तं प्रयुङ्क्ते- घनीभूतः प्रकाशः एव सूर्यमण्डलः इति। सूर्यमण्डलप्रकाशयोः भेदः यथा न सम्भवति। यतो हि प्रकाशः स्वरूपभूतः सूर्यमण्डलस्य। तद्वत् अहमपि ब्रह्मणः स्वरूपभूतः इत्यर्थः। अव्ययपदार्थः नित्यः इति। अमृतस्य इत्यर्थः मोक्षः। ऐकान्तिकपदार्थः कृतः अखण्डितः इति तेन अखण्डितसुखस्य इति अर्थः आयाति। तथाहि अहं नारायणः अमृतादिस्वरूपवतः ब्रह्मणः प्रतिष्ठा अस्मि इति फलितार्थः।

प्रकृतेऽस्मिन् श्लोके शङ्करभगवत्पादेन सह अस्य श्रीधराचार्यस्य अद्वैतत्त्वप्रतिपादने महान् भेदः नैव परिलक्ष्यते। ईश्वरब्रह्मणोः अभेदप्रतिपादने प्रयुक्तस्य दृष्टान्तस्य भेदो वर्तते उभयोः मतयोः। श्लोकार्थनिरूपणसन्दर्भे शब्दानामर्थकरणे वैसादृशं दृश्यते उभयोः मतयोः। श्लोके अस्मिन् अद्वैततत्त्वप्रतिपादने तु उभयोः मतयोः साम्यमेव दृश्यते।

**मधुसूदनाचार्यमतम्**— एतस्याचार्यस्य नये ब्रह्मपदेन जगदुत्पत्तिस्थिलयकारणं सोपाधिकं ब्रह्मैव ग्राह्यम्। तस्य सोपाधिकब्रह्मणः पारमार्थिकः निर्विकल्पकः उपाधिविवर्जितः तत्पदलक्ष्यः निर्विकल्पकः वासुदेवः अहं प्रतिष्ठा इत्यर्थः। यः निरुपाधिकं कल्पितरूपरहितं ब्रह्म सेवते सः ब्रह्मभूयाय कल्पते इति। कीदृशस्य ब्रह्मणः प्रतिष्ठाहं तदुच्यते— अमृतादिरूपस्य ब्रह्मणः प्रतिष्ठा। अमृतपदार्थः विनाशरहितः इति। अव्ययमित्युक्ते विपरिणामरहितम्। शाश्वतस्य नाम अपक्षयरहितस्येति। धर्मः नाम ज्ञाननिष्ठालक्षणप्राप्यत्वमिति। सुखस्य नाम परमानन्दरूपस्येति। सुखपदेन विषयेन्द्रियसंयोगजत्वं वार्यते। ऐकान्तिकपदार्थः कृतः अव्यभिचारीति अर्थात् सर्वस्मिन् देशे काले च वर्तमानस्य। एतादृशब्रह्मणः वास्तवं स्वरूपं यस्मादहं वासुदेवः तस्मात् मम भक्तः संसारात् विमुच्यते इति भावः। कार्यसत्तायाः कारणसत्तातिरिक्तायाः अनङ्गीकारात् इदं सिद्ध्यति कार्यं कारणादभिन्नमिति। अतः सर्वाणि कार्यवस्तुनि सोपाधिके ब्रह्मणि स्थितानि। तस्यापि

सोपाधिकब्रह्मणः निरुपाधिके ब्रह्मणि कल्पितत्वात् कल्पितस्य अधिष्ठानानतिरेकात् निरुपाधिकः भगवान् श्रीकृष्णः सर्वकल्पितानाम् अधिष्ठानभूतः इति निश्चितार्थः।

श्लोकार्थनिरूपणशैल्यां शाङ्करमतेन सह मधुसूदनाचार्याणां अधिकं साम्यं प्रतीयते। अस्मद्ब्रह्मणोः अभेदप्रतिपादने त्रिभिः आचार्यैः युक्तयः भिन्नाः आश्रिताः, अत्रैव वैसादृश्यं परिलक्षितम्।

**उपसंहारः**— यत् उत्तमं ज्ञानं प्रवक्ष्यामि 'परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्। यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः' इत्यादिना भगवता आदौ प्रोक्तम्। तज्ज्ञानं तु साक्षात् ब्रह्मणः हि श्लोकेन उक्तमिति बोध्यम्। इदमेव आत्मज्ञानमुत्तराध्याये विस्तरेण वक्ष्यति 'प्रकाशं च'[4] इत्यारभ्यः 'मां च योऽव्यभिचारेण'[5] इति श्लोकं यावत् उत्तमज्ञानसाधनम् उक्तमिति।

## Endnotes

1. श्रीमद्भगवद्गीता.१४.२७
2. श्रीमद्भगवद्गीता.१४.२१
3. श्रीमद्भगवद्गीता.१४.२६
4. श्रीमद्भगवद्गीता. १४.२२
5. श्रीमद्भगवद्गीता. १४.२६

## Bibliography


- श्रीमद्भगवद्गीता (बङ्गपुस्तकम्); स्वामी वासुदेवानन्द (व्याख्याकारः अनुवादकश्च); कलकाता, उद्बोधनकार्यालयः; २००९।
- ईशादि नौ उपनिषद् (शाङ्करभाष्यार्थः); शङ्कराचार्यः; गोरखपुरः - गीताप्रेस; २०१६।
- वेदान्तपरिभाषा; श्रीधर्मराजाध्वरीन्द्रः; शास्त्री श्रीगजानन, शास्त्री श्रीरामः (हिन्दीव्याख्याकारः सम्पादकश्च); वाराणसी, चौखम्बा विद्याभवन; २०१०।
- भामती (प्रथमः खण्डः); वाचस्पतिमिश्रः; श्रीश्रीमोहनः भट्टाचार्यः(सम्पादकः बङ्गभाषायामनुवादकश्च); कलकाता, संस्कृत पुस्तक भाण्डार; १९७३।
- वेदान्तसारः (बङ्गपुस्तकम्); सदानन्दयोगीन्द्रः; विपद्भञ्जनपालः (सम्पादकः) कोलकाता, संस्कृतपुस्तभाण्डारः; २०१०।
- श्रीमद्भगवद्गीता (अष्टटीकोपेता); प. वासुदेवलक्ष्मणशास्त्री-पणशीकरः (सम्पादकः); दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान; २००९।


——